1

गीतगो
१

श्रीगणेशाय नमः भद्रं पभवतां भूयात्सपतः स्मृतिभावितः कालिन्दीजलसंसर्गी मेघश्यामोऽतिसुन्दरः १ इह कविः प्रारीप्सितस्य ग्रंथ
स्य निर्विघ्नसमाप्त्यर्थं श्रीकृष्णस्मरणरूपं वस्तुनिर्देशलक्षणं मंगलं तावदाचरति मेघैरिति राधामाधवयो रहःकेलयो जयन्ति यमुनाकूले अथ श्रीमच्छः
राधामाधवयो रहःकेलयः क्रीडाः जयन्ति सर्वोत्कर्षेण वर्त्तन्ते कथंभूतयो राधामाधवयोः प्रत्यध्वकुंजद्रुमं अध्वनि मार्गे कुंजे लता
गृहे कुंजे द्रुमे च इत्थं नन्दनिदेशतो नन्दाज्ञया चलितयोः प्रस्थितयोः पद्मं अध्वकुंजद्रुमान्प्रति अनुक्षणं चलितयोरिति निर्दिं हे राधे अम्बरं आकाशं मेघैः

श्रीगणेशाय नमः मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय इत्थं नन्दनिदे
शतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः १ वाग्देवताचरितचित्रितचित्त
सद्मा पद्मावतीचरणचारणचक्रवर्ती श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधम् २

मेदुरं सान्द्रं व्याप्तमित्यर्थः वनभुवस्तमालद्रुमैस्तमालवृक्षैः श्यामाः अयं कृष्णः नक्तं रात्रौ भीरुर्भयशीलोऽतिबालत्वात् तस्मात्कारणात्त्व
मेव इमं कृष्णं गृहं प्रापय एवंप्रकारेण नन्दस्यानयोर्विश्वासाभावः सूचितः अधुना कविः सरस्वत्यादिनमस्कारपूर्वकं कृष्णस्य सुरतकी
डावर्णनं वक्तुमाह वाग्देवतेति जयदेवकविनेतं प्रबंधं कृष्णकेलिकथाप्रतिपादकं करोतीत्यन्वयः कथंभूतो जयदेवकविः वाग्देवताचरितचित्रि
तचित्तसद्मा वाग्देवतायाः सरस्वत्याश्चरितेन वचनरचनाविशेषेण चित्रितं मण्डितं चित्तसद्म मनोगृहं यस्य सः पुनः कथंभूतः पद्मावत्याख्यायाश्चरणे
न सर्वाहनेन चक्रवर्ती नरपदवल्लीमिव सुवर्णानि श्रीवासुदेवः श्रीकृष्णः तस्य रतिकेलि

गी॰गो॰वि॰
२

प्रलयेत्यादि जगदीश इत्यन्तं अस्य गीतस्य मालवरागतालं वितालविनोदितवत्त्रपदः प्रबन्धगतिः कुशलत्वात्प्रमत्तः संकेतशास्त्रोविंशतिपृष्ठे
केमालोधरोमालवरागराजः संपुष्पमालाभिधानेन रूपकः कथितोऽष्टः हे केशव धृतं मीनशरीरं येन सौ इत्यर्थः येन हे जगदीश हे हरे जय सर्वोत्कर्षेण
वर्तस्व कस्मादित्यत आह त्वं प्रलयपयोधिजले कल्पान्तजले वेदं धृतवानसि कथंभूतं वेदं अपरिश्रमं यथा पुनः कथंभूतोऽसि विहितं कृतं वहित्रचरित्रं समुद्र
तरणकारणं नौकाचेष्टितं यत्र क्रियायाम् १ क्षितिरिति हे केशव धृतं कच्छपरूपं येन हे जगदीश हे हरे जय तव पृष्ठे क्षितिः पृथ्वी तिष्ठति अत्यल्पः कथंभूते पृष्ठे अ
तिविपुलतरे अतिशयेन विपुलतरः पतत्येव येन पुनः कथंभूते पृष्ठे धरणीधरणेन किणचक्रं तेन गरिष्ठे २ वसतीति हे केशवेत्यादि पूर्ववत् धृ

प्रलयपयोधिजले धृतवानसि वेदं विहितवहित्रचरित्रमखेदं केशव धृतमीनशरीर जय जगदीश हरे १ क्षितिरतिविपुलतरे तव तिष्ठति
पृष्ठे धरणिधरणकिणचक्रगरिष्ठे केशव धृतकच्छपरूप जय जगदीश हरे २ वसति दशनशिखरे धरणी तव लग्ना शशिनि कलंक
कलेव निमग्ना केशव धृतशूकररूप जय जगदीश हरे ३ तव करकमलवरे नखमद्भुतशृंगं दलितहिरण्यकशिपुतनुभृंगम् केशव धृत
नरहरिरूप जय जगदीश हरे ४

तं शूकररूपं येन तव दशनशिखरे दन्ताग्रभागे धरणी पृथ्वी लग्ना सती वसति तत्र दृष्टान्तः शशिनि चन्द्रे निमग्ना अन्तःस्थिता कलंककलेव कलंकरेखेव वर्तते इति हे केशव
धृतं नरहरिरूपं येन तस्य संबोधने तव करकमलवरे हस्तपद्मश्रेष्ठे नखमस्ति तथा आहारः कथंभूतं नखं अद्भुतशृंगं अद्भुतमाश्चर्यकारकं शृंगं अग्रभागो यस्य २
अद्भुतत्वे हेतुमाह दलितो विदारितः हिरण्यकशिपोर्दैत्यपतेस्तनुर्देह एव भृंगो भ्रमरो येन अन्यत्र भ्रमरेण कमलं दलितं मतो हि इह तु वैपरीत्येनेत्याश्चर्यम् ४

कथं कविनिजग्रंथप्रयोजनमाह यदीति हे सभ्यजनास्तदा जयदेवसरस्वतीं शृणु इत्यन्वयः यदि यदि हरिस्मरणे चिंतने सरसं सानुरागं तदवश्यं मनोत्तीसन्न
यः यदि यदि विलासकलासु विलासो राधाकृष्णयोर्विलासे कामचतुष्षष्टिकलासु कुतूहलमस्ति कथंभूतां जयदेवसरस्वतीं मधुरां सरसां अर्थतः कोमलाः श
ब्दतः कांता मनोहरा पदावली पदसमूहो यस्यास्तां ३ कविरन्यग्रंथेभ्यो मुकुंदप्रेमरहो गुणाः संतीति द्योतयन्नाह वाच इति उमापतिधरकविर्वाच
र्णानि परं पल्लवयति विस्तारयति नतु गुणाढ्यत्वम् संदर्भशुद्धिमर्थतः शब्दश्च संघटनविशुद्धिं जयदेव एव परं जानीते नान्य इत्यर्थः शरणः कविर्दु

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम् ३
वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोव
र्द्धनस्पर्द्धी कोपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ४ गौडमालवरागे रूपकताले

द्रुते विषमार्गे यस्य शिघ्रो श्रावणातः श्लाघ्यः स्तुत्यः शृंगारेति शृंगारोत्तराणि शृंगारप्रधानानि सन्ति उत्तमानि प्रमेयानि वा वस्तूनि तेषां र
चनैः प्रबंधैः आचार्यगोवर्द्धनस्पर्द्धी कोपि न विश्रुतः आचार्यगोवर्द्धनः कविः शृंगारप्रधानमेव प्रबन्धं करोतीत्यर्थः धोयी नाम कविः
क्ष्मापतिः कविराजः श्रुतिधरः श्रुत्वा श्रवणमात्रेणैव धारयति नतु नरमो स्मितरागप्रवीणः इत्यर्थः राजपदेनमाहंकारं कथयन् क
विरहुनाम्नत्राज्ञग्नहार्थं विप्रलम्भावार्थं च दशावतारवर्णनमाह ४

गीतगो
3

म्लेछेति हे धृतकल्किशरीर धृतकल्क्यवतार त्वं म्लेछनिवहनिधने म्लेछसमूहनिमित्तं किमपि निर्वचनीयं करवालं खड्गं कलयसि धारयसि कथंभूतं करवालं धूमकेतुमिव अत्यंतिकतारकायानमिव करालं भयानकं यद्वा धूमकेतुरग्निः १० श्रीजयदेवेति हे धृतदशविधरूप धृतदशप्रकाररूप श्रीजयदेवकवेरिदमुदितं भाषितं शृणु आकर्णय एतेभ्यः सतां प्रस्तुतिः कीदृशं उदारं मनोहरं सुखदं सुखदायकत्वात् शुभदं कल्याणदायकं भवसारं धन्यं रूपं ११ उक्तानेवावतारान् पुनः संक्षेपेणाकीर्तयति वेदानिति तुभ्यं कृष्णाय नमः कथंभूताय कृष्णाय वेदानुद्धरते मीनरूपेण पुनः जगन्निवहते धारयते कू

म्लेछनिवहनिधने कलयसि करवालं धूमकेतुमिव किमपि करालं केशव धृतकल्किशरीर जय जगदीश हरे १० श्रीजयदेवकवेरिदमुदितमुदारं शृणु सुखदं शुभदं भवसारम् केशव धृतदशविधरूप जय जगदीश हरे ११ वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेछान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः १ गुर्जरीरागे प्रतिमठताले॥

र्मरूपेण भूगोलं पृथ्वीचक्रं उद्बिभ्रते ऊर्द्धं धारयते वराहरूपेण दैत्यं हिरण्यकशिपुं दारयते नृसिंहरूपेण बलिं दैत्यं छलयते वामनरूपेण क्षत्रक्षयं क्षत्रियनाशं कुर्वते परशुरामरूपेण पौलस्त्यं जयते दाशरथीरूपेण हलं लांगलं कलयते बलभद्ररूपेण कारुण्यमातन्वते बुद्धरूपेण म्लेछान् मूर्छयते नाशयते कल्क्यवताररूपेण अतएव दशाकृतिकृते दशविधरूपधारिणे १ किंविशिष्टा गीतिं गुर्जरीरागेण कथ्यते गीतिरागलक्षणं श्यामा सुवेशा मलयद्रुमाणां मृदुच्छदं … भूते … धाती … गुर्जरीयमिति १

3

3

१८

छलयसीति धृतवामनरूप येनैवं अद्भुतवामनाश्चर्यहेतुकवामन त्वं विक्रमणे पादविक्षेपेण त्वं बलिमसुरं छलयसि वंचयसि कीदृशस्त्वं इति सम्बोधने पदेति पद
नखनीरेण पदनखाग्रसंबंधिजलेन गंगारूपेण जनितं कृतं जनपावनं लोकपवित्रं येन सः क्षत्रियेति हे धृतभृगुपतिरूप परशुरामरूप क्षत्रियरुधिरमये पय
११४ सि जगत् स्नपयसि अन्वयः क्षत्रियशोणितविकारे जले जगत् स्नपयसि स्नानं कारयसि स्नाने प्रक्षालनात् कथंभूतं जगत् अपगतपापं गतकल्मषं पुनः किंभू
तं शमितभवतापं दूरीकृतसंसारतापं ६ वितरसीति हे धृतरामशरीर त्वं रणे संग्रामे दशमुखमौलिं बलिं रमणीयं रावणमस्तकोपहारं दिक्षु दिशासु वि

छलयसि विक्रमणे बलिमद्भुतवामन पदनखनीरजनितजनपावन केशवधृतवामनरूप जय जगदीश हरे ५ क्षत्रियरुधिरमये जगद
पगतपापं स्नपयसि पयसि शमितभवतापम् केशवधृतभृगुपतिरूप जय जगदीश हरे ६ वितरसि दिक्षु रणे दिक्पतिकमनीयं दशमुखमौ
लिबलिं रमणीयम् केशवधृतरामशरीर जय जगदीश हरे ७ वहसि वपुषि विशदे वसनं जलदाभं हलहतिभीतिमिलितयमुनाभं
केशवधृतहलधररूप जय जगदीश हरे ८ निंदसि यज्ञविधेरहह श्रुतिजातं सदयहृदयदर्शितपशुघातं केशवधृतबुद्धशरीर जय जगदीश हरे ९

तरसि कीदृशं दिक्पतिकमनीयं इन्द्रादीनां काम्यमिच्छाविषयमित्यर्थः रमणीयं मनोहरं दृष्ट्वा हृष्टत्वात् ७ वहसि हे धृतहलधररूप धृतबलभद्ररूप त्वं वपु
षि वसनं वस्त्रं वहसि धारयसि कथंभूते वपुषि विशदे शुभ्रे कथंभूतं वस्त्रं जलदाभं मेघसदृशं पुनः कथंभूतं हलहतिभीत्या यो जलान्तभये न मिलि
तायमुनाभोदृकाभा दीप्तिर्यस्य भयेनागतिश्यामत्वं भवति ८ निंदसीति हे धृतबुद्धशरीर धृतबुद्धावतार हे सदयहृदय सहितान्तः करुणा खलु हृदयं इति खेद
उत्कारे दयापात्रं त्वं यज्ञविधेः अनुविधानस्य श्रुतिजातं वेदसमूहं निंदसि [illegible] दर्शितः प्रतिपादितः पशूनां घातो हिंसा यत्र

वित स्वं हरे विरिष्टहरे तव चरणे प्रणता वयं सर्वे इति भावय जानीहि प्रणतेषु अस्मासु कुरु मंगलं ८ हे देव हरे जय जयेति प्रार्थयते श्रीजयदेवकवेरिदं कुरुते मंगल
गीतविशेषकं तुदं हर्षं कुरुते कुरुतात् तान् मोमीति विशेषः कथंभूतमिदं मंगलं उज्वलगीतं नानानुरागमनेन स्थगीतं गानं यस्मिन् ९ अथ नानाविधः कामोद्दीपकत्वाद्
सतस्य वर्णनव्याजेन कृष्णस्य गौरवं तु मेलनाय प्रत्याशंसंकुरुते पद्मेति मधुसूदनस्य कलक्ष्मीनीवक्षः स्थलं वो युष्मान् प्रियं मनोऽभिलाषमनुरूपं पत्नन्वयः कथंभूतमुरः प
मापाः लक्ष्म्याः पयोधरतटी तत्र नवा रितस्य रक्तस्य परीरंभणे नालिंगनेन लग्नपन्नाश्मीरकुंकुम केशरं तेन मुद्रितं विहितं मनोदवक्षः स्थलं नाम्नस्य इति भावः पुनः

तव चरणे प्रणता वयमिति भावय कुरु कुशलं प्रणतेषु जय जयदेव हरे ९ श्रीजयदेवकवेरिदं कुरुते मुदं मंगलमुज्वलगीतं जय जयदेव ह
रे १० पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य व्यक्तानुरागमिव खेलदनंगखेदस्वेदांबुपूरमनुपूरयतु प्रियं वः १
वसंते वासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे बहुविहितकृष्णानुसरणाम् अमंदं कंदर्पज्वरजनितचिंताकुलतया वलद्बाधां
राधां सरसमिदमूचे सहचरी २ वसन्तरागे रूपकताले

कथंभूतमिव व्यक्तानुरागमिव प्रकटमनुरागमिव पुनः कथंभूतं उरः खेलन् रवे सगतिं कुर्वन् यो नगः कंदर्पस्तस्य खेदेन सुरतायासेन स्वेदाम्बुपूरो धर्मजलप्रवाहो यत्र १
प्रभुनाविरहतो कष्टितावसाधया काचित्सखी सरसं सविलासं वहस्यमानं राधां प्रत्यवदत् कथंभूतां राधां वासंतीकुसुमसुकुमारैर्माधवीपुष्पसुकोमलैरवय
वैरंगैरुपलक्षितां उपलक्षितोऽतीया पुनः कथंभूतां राधां कांतारे गुर्जेमेवने भ्रमंतीं पुनः राधां बहुविहितं वारं वारं कृतो हारकृतं कृष्णानुसंधानं यया पु
नः कथंभूतां राधां अमंदमुत्कर्षेण यथा स्यात्तथा कंदर्पज्वरेण जनितया उत्पादितया चिंतया व्याकुलतया कोत्वावलंतीडरकंती बाधां पीडा यस्याः पूर्वो ४
क्तं मयं गीतेना ह ललितेति यस्य रागस्य छंदस्य [illegible] शिखरिणीवर्त्तो वयं वकुचूडः पुष्पनविकं चूत

4

श्रितेति हे देव हे हरे जय त्वं भक्तपक्षपाती सर्वोत्कर्षेण वर्तस्व श्रितेत्यादीनि सप्त संबोधनानि ए इति पदं हे इत्यर्थे श्रितकमलाकुचमण्डलाय श्रितं कमलायाः लक्ष्म्याः कुच
मण्डलं येन हे धृतकुण्डल हे कलितललितवनमाल कलिता धृता ललिता सुन्दरी वनमाला पुष्पदाम येन १ हे दिनमणिमण्डलमण्डन सूर्यमण्डलालंकारभूता हे भव
खण्डन भक्तानां संसारनाशक हे मुनिजनमानसहंस मुनिजनानां मानसे मनसि हंस इव मनसि हंसोऽसि जय जयेति पूर्ववत् २ कालियनाम्नः सर्पस्य गंजनवं
धन जनरंजन भक्तरंजकः यदुकुलेति पादवंशकमलसूर्यस्य ३ मधुमुरसंज्ञकानां दैत्यानां नाशकः गरुडासन गरुड एव आसनं यस्य सुरकुलानां देवसमूहानां

श्रितकमलाकुचमण्डलधृतकुण्डल ए कलितललितवनमाल जयजयदेवहरे १ दिनमणिमण्डलमण्डनभवखण्डन ए मुनिजन
मानसहंस जयजयदेवहरे २ कालियविषधरगंजनजनरंजन ए यदुकुलनलिनदिनेश जयजयदेवहरे ३ मधुमुरनरकवि
नाशन गरुडासन ए सुरकुलकेलिनिदान जयजयदेवहरे ४ अमलकमलदललोचन भवमोचन ए त्रिभुवनभवननिधान ज
यजयदेवहरे ५ जनकसुताकृतभूषण जितदूषण ए समरशमितदशकंठ जयजयदेवहरे ६ अभिनवजलधरसुन्दर धृतमन्दर ए श्रीमुखचन्द्र

केलेः क्रीडायाः सुरतस्य वा निदानं आदिकारणं ४ अमलकमलदलवत् निर्मले लोचने यस्य भवमोचनं यस्य संसारभंजकः भुवनमेव भुवनं गृहं
पद्मनिधानमिव निधिमिव ५ जनकेति जनकसुतया कृतं भूषणं कृतालंकारः जितदूषण जितराक्षस यद्वा जितपापः समरे संग्रामे शमितो मारितो दशकंठो
रावणो येन सजलमेघसुन्दर धृतमन्दराचलः श्रीमुखमेव चन्द्रं तस्य चकोर इव ६

गी गो वि
५

मदनेति कामस्य पस्य वनकरणकुवंतकनुविर्थस्य एवं भूतः केसरकुसुमविकासो नागकेशरपुष्पमुकुर्वै यस्मिन् मिलितेति मिलिताः शिलीमुखाः भ्रमराः येषु तैः पाटि-
लिपटलैः पाटलापुष्पसमूहैः कृतः स्मरतूनविलासः कामतूणिरचेष्टितं यत्र ४ विगलितलज्जितेति शिथिलावयवत्वात् एवं लज्जितस्य जगतः अवलोकनेन हसनेन
तरुणकरुणैः करुणावृक्षैः पुष्पविकाशव्याजेन कृतो हासो यत्र विरहीति विरहिणि कृन्तनानि मारकानि कुन्तमुखाकृतीनि भल्लमुखाकाराणि यानि केतकी-
पुष्पाणि तैर्दन्तुरिताः व्याप्ताः आशाः दिशाः यत्र माधविकेति माधविकायाः वासन्तीलतायाः परिमलितेन गन्धेन ललितेन मनोहरेण नवमालिकपानेवारपुष्पानि त
मिरतिसुगन्धो मुनिमनसामपि मोहनकारिणि मदनजनकैः तरुणानां पूनां अकारणबन्धौ सहजमित्रे वृन्दावनविपिने हरिः क्रीडतीत्यन्वयः ६ स्फु-

5

मदनमहीपतिकनकदंडरुचिकेशरकुसुमविकासे मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ४ विगलितलज्जित
जगदवलोकनतरुणकरुणकृतहासे विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे ५ माधविकापरिमलललिते नवमालि-
कयातिसुगंधौ मुनिमनसामपि मोहनकारिणि तरुणाकारणबंधौ ६ स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते वृन्दावन
विपिने परिसरपरिगतयमुनाजलपूते ७ श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारं सरसवसंतसमयवनवर्णनमनुगत मदनविकारं ८

रमिति स्फुरन्मार्व लतन्याः अतिमुक्तलतायाः वासंतीलतायाः परिरंभणेन मुकुलितः पुष्पितः पुलकितो हृष्टः आम्रवृक्षो यत्र कथंभूते वृन्दावनविपिने परिस-
रपरिगतयमुनाजलपूते परिसरे पर्यन्ते परिगतया प्राप्तया यमुनाजलेन पूते पवित्रे ७ श्रीजयदेवेति श्रीजयदेवकविरिदं भणितमुदयति ५
उदयं प्राप्नोतीत्यर्थः हरिचरणस्मृतिरनुचिंतनं सारो मुख्यं यत्र सरसं सुमनोहरं वसन्तसमयवर्णनं यत्र अनुगतो अनुलेतो मदनवि-
कारः कामविलासो यत्र ८

ललितेति हे सखि हरिरिह सरसवसंते विहरति युवतिजनेन समं नृत्यति ध्रुवगतपदेनान्वयः हे राधे हरिः तामस्मिन्नस्मिन् बसंतसमये क्रीडति कामिनीसमूहेन
नृत्यं करोति कीदृशे वसंते विरहिजनस्य वियोगिजनस्य दुरंते दुःखेनांतः समाप्तिर्यस्य तादृशो दुरन्तस्तस्मिन् इत्यर्थे हा पांसप्तपद्याः स्थिते नावन्तानविपिने शब्दे नोन
यः कीदृशे वसंते समये ललिते इत्यादि सप्तपदीपदानि वसंतसमयविशेषणानि ललिता याः मनोहरायाः लवंगलतायाः परिशीलनेन संपर्केण कोमले
गन्धे मनोहरो मलयपवनो येन तथा यानि तोपत्र अनेन वायोः सुगंधित्वमन्दत्वशीतलत्वानि उक्तानि मधुकरकरम्बेन भ्रमरसमूहेन करंबितैर्मिश्रितैः कोकिलैः

ललितलवंगलतापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरम्बितकोकिलकूजितकुंजकुटीरे १ विहरति हरिरिह सरसवसन्ते नृ-
त्यति युवतिजनेन समं सखि विरहिजनस्य दुरंते १ ध्रुवपदम् उन्मदमदनमनोरथपथिकवधूजनजनितविलापे अलिकुलसंकुलकुसुमस-
मूहनिराकुलबकुलकलापे २ मृगमदसौरभरभसवशंवदनवदलमालतिमाले युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ३

कूजितः शब्दितः कुंजस्य लतागृहे मे कुटीरे कुत्सितकुटी यत्र १ उन्मदेति उन्मत्तो मदनो हर्षकामो यत्र स वसंते मनोरथे पथस्य एवंभूतोपः पथिकः वधूजनः पथिकस्त्रीजनः
तान्जनित इत्यादि तेषां विलापः परिदेवनं यत्र अलिकुलेति अलिकुलैः भ्रमरसमूहैः संकुलः व्याप्तः कुसुमसमूहस्तेन निराकुलो मलयलोकबकुलानां वृक्षाणां कलापः
समूहो यत्र २ मृगेति मृगमदस्य कस्तूरिकायाः सौरभरभसवशंवदानुमितेतास्य पत्रहरवान्नीनवनूतनानादलमालतमनाये यां इत्यालतानानायत्र नूतन
पत्रतस्मा तो मृगमदन्मनुकरोति युवजनानां हृदयं विदारयति एवंविधो यो मनसिजः कामः तस्य नखानि तद्वत् रुचिर्दीप्तिर्येषां एवंभूतानां किंशुकानां
पलाशपुष्पाणां जालं समूहो यत्र ३

गीत.गो
६

स्वराग्रभावा स्वरभूषणानां नीयंनिवोलेव स्खलदुदन्तीकान्ते पदोपान्ते मा धिक्षितेदिम नोल्लनागमकलोचिशिख्य हे विलासिनि राधे कृष्णमेव वधूनिकरे
मनोहरकामिनीसमूहे हरिर्विलसति क्रीडति कथंभूते वधूनिकरे केलिपरे क्रीडातत्परे कथंभूतो हरिः चन्दनेति चन्दनेन मलयजेन चर्चितं रेखाकारानुलिप्तं
नीलकलेवरं शरीरं यस्य पीतं सुवर्णं वसनं वस्त्रं वनमाला यस्यास्तीति ततः प्रत्येकं कर्मधारयः पुनः कथंभूतः केलिना क्रीडया चलन्ती मणियुक्ते कुण्डले
कुण्डले ताभ्यां मण्डितं गण्डयुगं यस्य स्मितेन धास्येन शालते शोभते ततः कर्मधारयः १ पीनेति हे राधे काचिद्गोपवधूः गोपांगना पीनपयोधरभारेण विपुलकुच

चन्दनचर्चितनीलकलेवरपीतवसनवनमाली केलिचलन्मणिकुंडलमंडितगंडयुगस्मितशाली हरिरिहमुग्धवधूनि
करे विलासिनि विलसति केलिपरे १ ध्रुपदम् पीनपयोधरभारभरेण हरिं परिरम्य सरागं गोपवधूरनुगायति काचिदुदंचि
6
तपंचमरागं २ कापि विलासविलोलविलोचनखेलनजनितमनोजम् ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजं ३ का
पिकपोलतले मिलिता लपितुं किमपि श्रुतिमूले चारुचुचुंबनितंबवती दयितं पुलकैरनुकूले ४

गौरवातिशयेन सरागं यथा स्यात्तथा हरिं परिरभ्यालिंग्य उदंचितपंचमरागं अनुगायति उदंचितपंचमरागस्य स्वस्य पश्चाद्गायति गानं करोति हलः रागानां नंतरं स्वयं

६

वियोगिनां दुःसहेव वसंतवायुर्वर्णयति द्देरिति उरु वसंते गंधवाले वायुश्चेतः स्वर्याद्धि रहितरां दहतीत्यन्वयः किं कुर्वन् दलविदलितायाः ईषद्विकसितायाम्‍ल्या मल्लिका
याः वल्लीषु लतासु चंचद्भिर्भ्रमद्भिः परागैः पुष्परजोभिः प्रकटितपटवासैः स्फुटितपटवासदूर्गौः काननानि वनानि वासयन्सुरभी कुर्वन् पुनः कथंभूतः केतकीपुष्पारसां
गंधस्य बंधुःमित्रं प्रसरंतीये ऽसमवाणाः कामबाणास्तेषां प्राणावत्प्राणइव वसंतवासरा मनंगोद्दीपकत्वमाह ७ उन्मीलन्नेति अमी वसंतसंबन्धिनो वासरा दिवसाः प
थिकैः मार्गस्थैर्विरहिभिः कथंकथमपि केनापि दुःखेन नीयंते कथंभूता वासराः उन्मीलन्श्चासौ गंधश्च पुष्परस गंधस्तत्र लुब्धा येन मधुपा भ्रमरास्तैर्व्याधूताः कंपि
ताये चूतांकुरा याभ्यां कुरस्ते क्रीडतो कोकिलानां काकलीकलकलैः सुत्मां व्यक्ते मधुरध्वनिकोलाहलैः कर्णजनकत्वेनोद्गीर्णाः उत्कासीन कर्णज्वरः श्रवरोपता योषु

रविदलितमल्लीवल्लिचंचत्परागप्रकटितपटवासैर्वासयन्काननानि इह हि दहति चेतः केतकीगंधबन्धुःप्रसरदसमबाणप्राणवद्गंधवाहः
7 १ उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः नीयंते पथिकैः कथंकथमपि ध्याना
वधानात्क्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः २ अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं मुरारि
मारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम् ३ नामकर्णाटरागे रूपकताले

कथं नीयंते इत्यत आह ध्यानेति ध्याने चिंतने ऽवधानं चित्तैकाग्र्यं तेन सहसा क्षणप्राप्ता प्राणसमा प्राणतुल्या नायिकायाः समागमरसेन संबन्धेन रस
नूपरसेन उल्लासो हर्षो येषां ते २ अनेकेति असौ सखी राधिकां पुनराहेत्यन्वयः कथंभूता सखी आराद्दूरस्थं वर्तमानं समक्षं पश्चात्तं यथा स्यात्तथा मुरारिमुपदर्शयन्ती
किं कुर्वंती वीक्ष्यंतं हरिं अनेकनारीणां परिरंभसंभ्रमेणालिंगनादरेण स्फुरितस्तत्तो गच्छन्मनोहारी मनोज्ञो यो विलासः क्रीडा तत्र लालसं आ
रब्धवान् पश्चात्तं धारयः अमुमेवश्लोकोत्तमर्थमाह नामकर्णाटरागे रूपकताले